# The Divine and the Demonical

Bhagavad Gita Chapter 16

The Yoga of Distinction of Divine and Demoniac Nature

## Description of the Divine

**श्री भगवानुवाच**

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।**

**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।१।**

श्रीभगवान् the blessed Lord उवाच said अभयम् fearlessness सत्त्वसंशुद्धिः pure *sattva* ज्ञानयोगव्यवस्थितिः steadfastness in knowledge and yoga दानम् charity दमः self-restraint च and यज्ञः *yajña* sacrifice च andस्वाध्यायः self-study तपः austerity आर्जवम् uprightness

The blessed Lord said:

1. Fearlessness, complete purity, steadfastness in knowledge and yoga, charity, self-restraint and yajña sacrifice, self-study, austerity, and uprightness.

**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।**

**दया भूतेष्वलोलुप्त्वंमार्दवं ह्रीरचापलम् ।२।**

अहिंसा harmlessness सत्यम् truth अक्रोधः absence of anger त्यागः renunciation शान्तिः peace अपैशुनम् absence of calumny दया भूतेषु compassion for beings अलोलुप्त्वम् uncovetousness मार्दवम् gentleness ह्रीः modesty अचापलम् absence of fickleness

2. Harmlessness, truth, absence of anger, renunciation, peace, absence of calumny, compassion for beings, un-covetousness, gentleness, modesty, absence of fickleness.

**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**

**भवन्ति संपदं दैवीमभिजातस्य भारत ।३।**

तेजः spiritual lustre क्षमा forgiveness धृतिः steadfastness शौचम् purity अद्रोहः absence of malice न not अतिमानिता much pride भवन्ति belong संपदम् state दैवीम् divine अभिजातस्य of the born भारत O Bhārata (Arjuna)

3. Spiritual lustre, forgiveness, steadfastness, purity, absence of malice, absence of much pride - these belong to one born of divine state, O Bhārata .

Description of the Demonical

**दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।**
**अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ।४।**

दम्भः ostentation दर्पः arrogance अभिमानः self-conceit क्रोधः anger पारुष्यम् harshness एव also च and अज्ञानम् ignorance च and अभिजातस्य of the born पार्थ O Pārtha (Arjuna) सम्पदम् nature आसुरीम् demoniac

4. Ostentation, arrogance, self-conceit, and anger, also harshness and ignorance belong, O Pārtha, to one born of demoniac nature.

**असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।**
**अपरस्परसंभूतं किमन्यत्कामहैतुकम् ।८।**

असत्यम् without Reality अप्रतिष्ठम् without foundation ते they जगत् world आहुः say अनीश्वरम् without Lord अपरस्परसंभूतम् born of mutual union किम् what अन्यत् else कामहैतुकम् caused by lust

8. They say, "The world is without Reality, without foundation, without Lord, born of mutual union caused by lust - what else?"

**एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।**
**प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ।९।**

एताम् this दृष्टिम् view अवष्टभ्य holding नष्टात्मानः ruined souls अल्पबुद्धयः of small intellect प्रभवन्ति come forth उग्रकर्माणः of fierce deeds क्षयाय for destruction जगतः of the world अहिताः enemies

9. Holding this view, the ruined souls of small intellect, of fierce deeds, come forth as enemies for the destruction of the world.

**काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।**
**मोहाद्गृहीत्वासद्ग्राहा-न्प्रवर्तन्तेऽशुचिव्रताः ।१०।**

कामम् desire आश्रित्य abiding in दुष्पूरम् insatiable दम्भः hypocrisy मानः pride मदः arrogance अन्विताः overpowered by मोहात् from delusion गृहीत्वा having gripped असद्ग्राहान् evil ideas प्रवर्तन्ते (they) work अशुचिव्रताः with impure resolves

10. Abiding in insatiable desire, overpowered by hypocrisy, pride and arrogance, gripped by evil ideas through delusion, they work with impure resolves.

**चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।**
**कामोपभोगपरमा एतावदिति निश्चिताः ।११।**

चिन्ताम् care अपरिमेयाम् immense च and प्रलयान्ताम ending only with death उपाश्रिताः refuged in काम उपभोगः sensual enjoyments परमाः (their) highest aim एतावत् this is all इति thus निश्चिताः feeling sure

11. Beset with immense care ending only with death, with sensual enjoyments their highest aim, feeling sure 'this is all'.

<u>The Divine rise to the Highest Goal</u>

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।**
**कामः क्रोधस्तथा लोभ- स्तस्मादेतत्त्रयंत्यजेत् ।२१।**

त्रिविधम् triple नरकस्य of hell इदम् this द्वारम् gate नाशनम् destructive आत्मनः of the Self कामः desire क्रोधः anger तथा also लोभः greed तस्मात् therefore एतत् this त्रयम् threesome त्यजेत् (one) should abandon

21. Triple is this gate of hell, destructive of the Self – desire, anger, and greed; therefore, one should abandon these three.

**एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।**
**आचरत्यात्मनः श्रेय- स्ततो याति परां गतिम्।२२।**

एतैः by these विमुक्तः liberated कौन्तेय O Kaunteya (Arjuna) तमोद्वारैः by gates of darkness त्रिभिः (by) three नरः man आचरति acts आत्मनः for himself श्रेयः good ततः thence याति (he) goes पराम् supreme गतिम् Goal

22. Liberated from these three gates of darkness O Kaunteya, man does good to himself, thence reaches the supreme Goal.

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।२३।**

यः he who शास्त्रविधिम् scriptural ordinance उत्सृज्य having cast away वर्तते acts कामकारतः under impulse of desire न neither सः he सिद्धिम् perfection अवाप्नोति attains न nor सुखम् happiness न nor पराम् supreme गतिम् Goal

23. He who casts aside scriptural ordinance and acts under the impulse of desire attains neither perfection nor happiness nor the supreme Goal.

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि।२४।**

तस्मात् therefore शास्त्रम् *śāstra* scripture प्रमाणम् (be) authority ते your कार्याकार्यव्यवस्थितौ in determining what ought to be done or what ought not to be done ज्ञात्वा having known शास्त्रविधानोक्तम् what is pronounced in scriptural ordinance कर्म action कर्तुम् to do इह here अर्हसि (you) should

24. Therefore, the scripture is your authority in determining what ought to be done and what ought not to be done; having known what is pronounced in scriptural ordinance you should perform action here.